EISSN-2584-2870

देवभूमि-सौरभम्
Devabhūmisaurabham

Vol 1 Issue 2 July-Dec 2024 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# शाकुन्तलनाटके आदर्शपिता महर्षिकण्वः

**श्रीकरः वि**
शोधच्छात्रः
केन्द्रीयसंस्कृतविश्वविद्यालयः
राजीवगान्धीपरिसरः,शृङ्गेरी

---

**मुख्यशब्दाः-** कुटुम्बम्, पिता, शाकुन्तलम्, कालिदासः, उपदेशः, गान्धर्वविवाहः

**सारांशः -** कुटुम्बेषु पितुः स्थानम् अत्यन्तमहत्त्वपूर्णमस्ति। पितरः त्रीणि प्राथमिकभूमिकाः निर्वहन्ति। ते रक्षकरूपेण , प्रदातृरूपेण , अनुशासकरूपेण च परिवारस्य समृद्धिं साधायन्ति । पितुः महान् प्रभावः सन्ततेरुपरि भवति। अभिज्ञानशाकुन्तलमाध्यमेन कविकुलगुरुकालिदासः आदर्शपितृव्यवहारः कथं स्यादिति अदर्शयत्। अस्मिन् लेखे महर्षिकण्वः स्वपुत्र्याः शकुन्तलायाः विषये कथं वात्सल्यं प्रदर्शितवान् इति निरूपितं वर्तते।

**शोधपत्रम्-**

'कुटुम्ब-धारणे । कुटुम्बयति धारयति, बहूनामाश्रयदानेन इति कुटुम्बः' । कुटुम्बस्य महत्त्वं किमिति वयं जानीमः । भारतीयसंस्कृतेः श्रेष्ठत्वं तस्य कुटुम्बजीवनव्यवस्थामाश्रित्य वर्तते। एकस्मिन् कुटुम्बे वर्तमानः कश्चन यथा गौरवभाग्भवति, न तथा कुटुम्बविहीनः। ब्रह्मचर्यादि चतुर्ष्वाश्रमेषु प्रधान इति परिगणितः गृहस्थाश्रमः कुटुम्ब इत्यस्यैव नामान्तरम्।

उच्यते मनुना-

यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तवः।
तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः॥

कवयोऽपि लोकसङ्ग्रहनिरताः सन्तः स्वकाव्येषु कुटुम्बस्यौन्नत्यं चित्रयित्वा लोकानां पुरतः कुटुम्बस्यादर्शं प्रस्तुतवन्तः । अस्माकं जीवनेऽस्माकं वाङ्मयस्य प्रभावः सुमहान् वर्तते । विशिष्य रामायण-महाभारतादीनां प्रभाव एतावान् वर्तते यत्तदभावे भारतीयसमाजस्य जीवनरीतेश्च कल्पनाऽपि कर्तुं नैव शक्यते । रामायणे रामस्य पितृवाक्यपरिपालनम्, भ्रातृस्नेहः, सीतायामतिशयितोऽनुरागः, भरतस्य भ्रातृप्रेम, लक्ष्मणस्य रामान्तर्गतत्वम्, सीतायाः सहन-शीलता, कौसल्याया दुःखसहनम्, महाभारते द्रौपद्याऽनुसृतानि कौटुम्बिकजीवनतत्त्वानि, भासमहाकवेः रूपकेषु कौटुम्बिकजीवनस्य प्राधान्यम्, कौटुम्बिकं प्रेम, कालिदासस्य कृतिषु कौटुम्बिकजीवनस्यौन्नत्यम्, इत्यादिसन्दर्भाः द्रष्टुं शक्यन्ते।

लोके सामान्यतः स्वापत्येषु समर्पितजीवनाः मातरः दृश्यन्त एव । किन्तु अनुपमं पितृत्वमपि संस्कृतकाव्येषु दृश्यते । अभिज्ञानशाकुन्तले कण्वमहर्षिः तादृशः पिता। सामान्यतः पुत्राणां विवाहः पित्रोरनुमतिं विना नैव भवति भारतीयसंस्कृतौ। किन्तु क्षत्रियेषु गान्धर्वविवाहः कालिदासस्य काले सामान्यरूपेणैव भवति स्मेति ज्ञायते। तथा दुष्यन्तनामकं चतुरुदधि-मेखलाया भुवः भर्तारं स्वानुमतिं विना वृणीतवत्यां शकुन्तलायां न क्रुद्धः कण्वमहर्षिः । प्रत्युत ताम् अभिनन्द्य सगौरवं तां दुष्यन्तं प्रति प्रेषयति । अभिज्ञान-शाकुन्तलनाटकस्य पञ्चमाङ्के शार्ङ्गरवः दुष्यन्ताय कण्वसन्देशमेवं निवेदयति-'यन्मिथः समयादिमां मदीयां दुहितरं भवानुपायंस्त तन्मया प्रीतिमता युवयोरनुमतम्' ।

त्वमर्हतामग्रसरः स्मृतोऽसि नः शकुन्तला मूर्तिमती च सत्क्रिया।
समानयन् तुल्यगुणं वधूवरं चिरस्य वाच्यं न गतः प्रजापतिः ॥१५॥

इति । विश्वप्रथितेऽभिज्ञानशाकुन्तले विचित्ररूपेणेदं पितृत्वं प्रस्तुतमस्ति महाकविना कालिदासेन । शकुन्तलायाः पितरौ जन्मदातारौ मेनकाविश्वामित्रौ । तस्याः जननसमनन्तरमेव पित्रोरसहजं वर्तनं ताभ्यां कृतम् । उभावपि तां त्यक्त्वा गतवन्तौ । किन्तु कण्वमहर्षिणां हृदि पितृवात्सल्यम् उद्गतं तां शिशुं दृष्ट्वा । न केवलं तस्मिन् सन्दर्भ एव कारुण्येन तदभूदिति चिन्तनीयमस्माभिः । यतः आन्तं यावत्तेषां पितृहृदयं कीदृशमासीदिति अस्माभिः साक्षात्क्रियते ।

पुत्र्याः ग्रहगतिः सम्यक् नास्तीति तदर्थं प्रार्थनादिकं कर्तुं सोमतीर्थं गच्छति कण्वमहर्षिः । तस्य प्रत्यागमनकाले शकुन्तला-दुष्यन्तयोः विवाहः गान्धर्वविधिना निर्वर्तित आसीत् । प्रायः कण्वमहर्षेः स्थाने अन्ये वर्तन्ते चेदवश्यमेव शकुन्तला तेषां शापस्य लक्ष्यं भवति स्म । किन्तु कण्वमहर्षिः ज्ञानदृष्ट्यैव सर्वमपि ज्ञात्वा योग्यमेव वरं वृतवती शकुन्तलेति प्रहृष्य सम्पूर्णेन मनसा आशीः दत्तवान् । प्रायः अस्मिन् कालेऽपि एतादृशा पितरः दुर्लभा इत्येव वक्तव्यम् । यतः बहुषु पितृषु, 'मया चित एव पुत्र्या वरणीय' इति भावना मनसि भवत्येव । तदा वरस्य योग्यतादयः तैः न परिगण्यन्ते । एष एव विचारः द्वेषस्यापि कारणं भवति । वस्तुतः शकुन्तलया दोष एवाचरितः । पितृभ्यामनाथीकृतामाश्रममानीय स्वापत्यमिव येन सा पालिता,ताननुक्त्वैव यत्कृतं तया, तत्र गुणस्तु अत्यल्प एव । किन्तु कण्वमहर्षिः तत्रापि गुणमेव पश्यति । 'योग्याय वराय सा दातव्येति चिन्तितमेव मया, तद्यदि दैवेनैव क्रियते तर्हि तत्र विरोधस्य किं वा कारणम् ?' शकुन्तलां दुष्यन्तं प्रति प्रेषयितुं यदा प्रवृत्तः तदा लौकिकमातापितृवदेव वियोगदुःखमनुभवति । वनतरुलतानां मृगादीनाञ्च पुरतः तद्दुःखं प्रदर्शितमपि । एतत्पद्यं तस्य मनोभावनाम् अत्यन्तं रमणीयतया ऽभिव्यनक्ति-

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठस्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमपि स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥[1]

अत्र कण्वमहर्षिः चरमोत्कर्षस्य नारीजीवनस्य मन्त्रानुपदिदेश । सर्वथा भार्यया स्वभर्तुः गृहे गुरुजनानां पत्युश्च सेवा कर्तव्या, भर्त्रा अपमानितापि विरोधः न प्रकटनीयः, यतः भर्तुः सेवैव पत्न्याः शाश्वतिको धर्मः। अतः पातिव्रत्येनैव पत्न्यः सर्वोत्कृष्टं पदं लभन्ते। वैषयिकान् भोगान् अवाप्यापि तेषु लिप्सया न भाव्यम् । एवं व्यवहारकारिण्यः पत्न्यः भर्तृवल्लभाः भवन्ति। एतद्विरुद्धाचरणशालिन्यस्तु नार्यः वंशस्य दुःखदायिन्य एव भवन्ति । अयमेवाभिप्रायः -

पत्याऽविराधयन्ती। (अ-2-36-4)
जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम् । (अ-3-30-2)
पत्युरनुव्रता भूत्वा सं न ह्यस्वामृताय कम् । (अ14-1-42)

इत्यादिषु वेदवाक्येष्वपि दृश्यते ।

कालिदासस्य काव्यानि अत्युत्तमकुटुम्बव्यवस्थायाः प्रख्यापकानि भवन्ति । पत्या पत्नी, तथैव पत्न्या पतिः परस्परं सगौरवं द्रष्टव्यौ इत्येव तस्याभिप्राय इति प्रतीयते । अभिज्ञानशाकुन्तलस्य चतुर्थाङ्के शकुन्तलाप्रस्थानावसरे शकुन्तलादुष्यन्तयोः कृते कण्वमहर्षिणा दत्तः सन्देशः परिपूर्णकुटुम्बनिर्माणस्य मूलाधार इति ज्ञायते । महर्षिः दुष्यन्तमेवं सन्दिशति-

अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मनः
त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः ॥

इति । विवाहः यद्यपि वधूवरयोरेव तथापि तत्र पित्रोः बान्धवानाञ्च पात्रमस्त्येव साक्षीरूपेण । किन्तु भवान् ममानुपस्थितौ, आश्रमे वर्तमानान् बन्धुजनानपि अपृष्ट्वा शकुन्तलां परिणीतवान् । कोऽपि साक्षी नास्तीति कृत्वा इदानीं भवता न तिरस्करणीया तस्याः स्नेहप्रवृत्तिः त्वया माननीया । यदि सा निराक्रियते भवता तर्हि हानिः न केवलं तस्याः, किन्तु भवतोऽपि । यतः भवतः राष्ट्रस्य उत्तराधिकारी शकुन्तलायाः गर्भस्थः शिशुः । स त्वया न लभ्यते । वयं संयमधनाः, किन्तु शापानुग्रहसमर्थाः इति न विस्मर्तव्यं भवता । 'राजानो बहुवल्लभाः' इति वचनानुसारं बह्व्यः पत्न्यः भवन्तु नाम, किन्तु तासु उच्चावचभावः पत्युः न भवेत् । कापि पत्नी नावमन्तव्या । यतः तथा कृते सति कुटुम्बे वर्तमानमैक्यं नश्यति । तदेव खलु कौटुम्बिक-अनर्थपरम्पराया मूलम् । अतः मम पुत्री शकुन्तला अन्यपत्नीवदेव

---

[1] अभिज्ञानशाकुन्तलम् -४/८

द्रष्टव्या। सा नावमन्तव्या, यतः तस्याः मनसि क्लेशः नोत्पादनीयः। न वा अन्यपत्नीभ्योऽप्यधिकतया द्रष्टव्या, येन अन्यासां क्लेशः जायते, शकुन्तलापि अवलिप्ता भवेत्। एवं यदि वर्तसे तर्हि भवतः कुटुम्बं सर्वरीत्यापि समीचीनं भवेत्।

शकुन्तलायाः कृते दत्तं सन्देशं पश्यामः-

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृताऽपि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामा कुलस्याधयः ॥[2]

गुरुजनाः दुष्यन्तस्य मातापितरौ, अन्ये यदि सन्ति ते च। सर्वानपि शुश्रूषस्व। दुष्यन्तः राजा। तस्य मातापित्रोः सेवार्थं समयः न लभ्येत। तदा तत्कर्तव्यं त्वया पूरणीयम्। पत्युः अर्धाङ्गिनी भूत्वा न केवलं तेन प्राप्यमाणे सन्तोष एव भागग्रहणं तव, किन्तु तस्य कर्तव्येऽपि भागः वोढव्य इति 'दम्पत्योः सहाधिकारः' इत्यस्य वाक्यस्य व्याख्यानम् अनन्यसाधारणरीत्या कृतमस्ति कण्वमहर्षिणा। सपत्न्यः दुष्यन्तस्य अन्यपत्न्यः सखीदृष्ट्या द्रष्टव्याः, न तु शत्रुत्वेन। अन्यथा कुटुम्बे वैरभावः प्रसज्येत। अन्यत्किमावश्यकं कुटुम्बविनाशाय ? राजा दुष्यन्तः राजकार्येषु व्यग्रः सन् कदाचित् श्रान्त्याधिक्येन अन्यकारणाद्वा कुप्येत। तदा तस्य प्रतिवचनमुक्त्वा तद्विरुद्धं नाचरेत्। यद्याचरसि तदा तस्य कोपः इतोऽप्यधिकं भवेत्। द्वयोरपि रोषे कुटुम्बस्य शान्तिः विनश्यति। तत्परिणामतः दुष्यन्तस्य राजकार्ये हानिः सञ्जायेत। तदा तस्य अपकीर्तेः कारणं भवसि त्वम्। तन्माभूत्। बहवो परिजनाः भवन्ति राजभवने। तैः सहापि सद्वर्तनं भवेत्तव। तेषां कृते यद्देयं तत् सम्पूर्णतया सम्पूर्णमनसा च देयम्। एतत्तव भाग्यं यत् एतावत्कालपर्यन्तमपि अनपत्यः दुष्यन्तः इदानीं त्वया पुत्रवान् सञ्जातः। राज्ञः अस्य भाग्यस्य कारणीभूतेति उत्सेकः मास्तु तव। तेन त्वयि पत्युः विश्वासः नश्येत्। एवंरीत्या या वर्तते सैव गृहिणीपदं याति, नान्या। एवं सर्वेषामपि प्रीतिपात्रं कथं भवेदिति, कुटुम्बस्य संरक्षणं कथं कुर्यादिति च कण्वमहर्षिः शकुन्तलां बोधयित्वा 'वनौकसोऽपि वयं लोकवृत्तान्तनिष्णाताः[3] ' इत्येतत् दर्शितवान्। इति शम्।

**सन्दर्भग्रन्थसूची**

1. कालिदास की कला और् संस्कृति, डा देवीदत्त शर्मा,देववाणी परिषत्,दिल्ली,प्रथम संस्करण-१९८१
2. अभिज्ञानशाकुन्तलम्,कालिदासः,कपिलदेव द्विवेदी, समनारायणलाल विजयकुमार, इलाहबाद,सस्करण, १९९७
3. संस्कृत आलोचन, बलदेव उपाध्याय,लीडर् प्रेस इलाहबाद्,द्वितीयसंस्करण, १९६३
4. Narang, Manju, Bhāsa aur Kālidasa ke Nāṭakon kā Vivecanātmak Adhyayan, Manasi Prakashan, Kailaspuri, Merath, 1994
5. Works of Kalidasa - Devadhar C.R. (Ed.), Vol.2 (Poetry), Motilal Banarsidas, Delhi, 1984

[2] अभिज्ञानशाकुन्तलम्-४ अङ्कः

[3] अभिज्ञानशाकुन्तलम्-४